ज्यवते पश्चिमो जनं व्रतमुपदिशतीत्यर्थः। ज्यवते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

ज्योतिः, [स्] क्ली, (ज्युत दीप्तौ+इसः। यद्वा, द्युत दीप्तौ+"द्युतेरिसिन्नादेश्च जः।" उणां। २।१११। इति इसिन् दस्य च जः।) दृष्टिः। नक्षत्रम्। (यथा, "ज्योतींष्यग्निश्चामेध्यमप्रशस्तञ्च नाभिवीक्षेत॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये॥) प्रकाशः। इति मेदिनी। से, २३॥

ज्योतिः, [स्] पुं, (ज्योतते इति। ज्युत+कर्त्तरि इसिः। द्युत+इसिन् वा।) अग्निः। (यथा,—
"तस्यान्तरेण नाभेस्तु ज्योतिः स्थानं ध्रुवं स्मृतम्। तदा धमति वातस्तु देहस्तेनास्य वर्द्धते॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥) सूर्य्यः। इति मेदिनी। से, २२॥ मेथिका। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते १३।१४९।७६।
"स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः॥")

ज्योतिरिङ्गः, पुं, (ज्योतिषा इङ्गतीति। इगि गतौ+अच्। ज्योतिरिव इङ्गतीति वा।) खद्योतः। इति शब्दरत्नावली॥

ज्योतिरिङ्गणः, पुं, (ज्योतिरिव इङ्गतीति। इगि गतौ+ल्युः।) कीटविशेषः। ज्योनाकपोका इति भाषा। तत्पर्य्यायः। खद्योतः २ ध्वान्तोन्मेषः ३ तमोमणिः ४ इरिवन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८। इति शब्दरत्नावली॥ ज्योतिर्बीजम् ९ निमेषरुक् १०। इति त्रिकाण्डशेषः॥

ज्योतिर्बीजं, क्ली, (ज्योतिर्बीजमिवास्य ज्योतिषो बीजमिव वा।) ज्योतिरिङ्गणः। इति त्रिकाण्डशेषः॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः।) दुर्गा। अस्या नामनिरुक्तिर्यथा,—
"हस्तं शरीरमित्याहुर्हस्तश्च गगनं तथा। ज्योतिषि ग्रहनक्षत्राज्ज्योतिर्हस्ता ततः स्मृता॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्म्मयं चक्रम्। ज्योतिर्भिः स्वस्वावस्थानेन विरचितं चक्रं वा।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम्। राशिचक्रम्। यथा,
"ज्योतिश्चक्रं सुवी मानमर्द्धा प्रोवाच केशवः। चातुर्लक्षं ज्योतिषस्य सारं रुद्राय सर्व्वदः॥"
इति गरुड़पुराणम्॥
अपि च तिथ्यादितत्त्वे।
"सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशे भवेद्राशिर्नवर्क्षचरणाङ्कितः॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्।) वेदाङ्गशास्त्रविशेषः। तत् ग्रहगणितगणनशास्त्रम्। इत्यमरटीकायां भरतः॥
"पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता। केरलः शकुनश्चैव ——————॥"
इति शब्दरत्नटीका॥
अस्य सम्बन्धादि यथा,—
"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति चोदितः। अभिधेयञ्च जगतां शुभाशुभनिरूपणम्॥ इज्याध्ययनसंक्रान्तिग्रहषोड़शकर्म्मणाम्। प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः॥"
इति नारदीयम्॥ *॥
अस्याध्ययनं द्विजैः कर्त्तव्यम्। यथा,—
"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्। वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्॥ विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति। तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा॥ अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः॥"
इति नारदः॥ *॥
शूद्रस्य पाठनिषेधो यथा,—
"स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा। शूद्राणामुपदेशन्तु दद्यात् स नरकं व्रजेत्॥"
इति गर्गः॥ *॥
अस्य ज्ञानमावश्यकं यथा,—
"वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान्॥
यथा शिखा मयूराणां नागानां मणयो यथा। तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्ध्नि संस्थितम्॥"
इति वेदाङ्गज्योतिषम्॥ *॥
अस्याध्ययनफलं यथा,—
"एवंविधस्य श्रुतिनेत्रशास्त्र-
स्वरूपभर्त्तुः खलु दर्शनं वै।
निहन्त्यशेषं कलुषं जनानां
षड़ब्दजं धर्म्मसुखास्पदं स्यात्॥"
इति माण्डव्यः॥ *॥
अस्य ज्ञाने फलं यथा,—
"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम्। ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम्॥"
इति गर्गः॥

ज्योतिषिकः, पुं, (ज्योतिर्ज्योतिःशास्त्रं अधीते इति। क्रतूक्थादित्वात् ठक् संज्ञापूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः।) ज्योतिषिकः। इत्यमरटीका॥ (यथा, मार्कण्डेये।
"धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुड़ाश्वकाः॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च।) तारा। इति हेमचन्द्रः। ज्योतिषशास्त्रज्ञे, त्रि॥

ज्योतिष्कः, पुं, (ज्योतिरिव कायतीति। कै+कः।) चित्रकवृक्षः। मेथिकाबीजम्। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण स्वर्ज्जिका हिङ्गु मिश्रं पिबेत्॥" इति चिकित्सितस्थाने चतुर्द्दशेऽध्याये सुश्रुतेनोक्तम्॥) गणिकारिकावृक्षः। इति रत्नमाला॥

ज्योतिष्काः, पुं, (ज्योतिर्भिः कायतीति। कै+कः।) चन्द्रार्कग्रहनक्षत्रतारकाः। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति। कै+कः टाप् च।) ज्योतिष्मतीलता। इत्यमरटीकायां स्वामी॥

ज्योतिष्टोमः, पुं, (ज्योतींषि त्रिवृदादयः स्तोमा यस्य। "ज्योतिरायुषः स्तोमः।" ८।३।८३। इति षत्वम्।) षोड़शर्त्विक्साध्ययज्ञविशेषः। तत्र द्वादशशतगोदक्षिणा। इति मलमासतत्त्वम्॥ (यथा, महाभारते। ३।२२१।३६।
"बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति। मतुप् उदित्वात् ङीप् च।) लताविशेषः। मालकङ्गनी इति लताफट्करी इति नयाफट्की इति च भाषा॥ तत्पर्य्यायः। पारावताङ्घ्रिः २ कटभी ३ पिण्या ४। इत्यमरः।२।४।१५०॥ पारावतपदी ५ नगणा ६ स्फुटवन्धनी ७ पूतितैला ८ इङ्गुदी ९। इति रत्नमाला॥ स्वर्णलता १० अनलप्रभा ११ ज्योतिर्लता १२ सुपिङ्गला १३ दीप्ता १४ मेध्या १५ मतिदा १६ दुर्ज्जरा १७ सरस्वती १८ अमृता १९। अस्याः स्वल्पमाया गुणाः। अतितिक्तत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वञ्च। अस्याः स्थूलाया गुणाः। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञावुद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ तीक्ष्णत्वम्। व्रणविस्फोटनाशित्वञ्च। इति राजवल्लभः॥ रात्रिः। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, मात्स्ये।१२०।६५।
"सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या। अवगाढ़े ह्युभयतः समुद्रौ पूर्व्वपश्चिमौ॥"
ज्योतिर्विशिष्टे, त्रि। यथा, रघुः।६।२२।
"नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सूर्य्यादीनामाधारत्वात् तथात्वमिति बोध्यम्।) ध्रुवः। इति त्रिकाण्डशेषः॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति। "ज्योत्स्नातमिस्रेति।" ५।२।११४। इति निपातनात् नप्रत्यय उपधालोपश्च।) चन्द्रज्योतिः। चाँदनी इति हिन्दी भाषा॥ तत्पर्य्यायः। चन्द्रिका २ कौमुदी ३। इत्यमरः।१।३।१६॥ चान्द्री ४ कामवल्लभा ५ चान्द्रातपः ६ चन्द्रकान्ता ७ शीता ८ अमृततरङ्गिणी ९। (यथा, महाभारते।१।१।८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः॥")
ज्योत्स्नायुक्तरात्रिः। इति मेदिनी। ने, ८॥ पटोलिका। इत्यमरटीकायां स्वामी॥ अस्या गुणाः। त्रिदोषशमनत्वम्। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। दाहरक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥ श्वेतघोषा। इति